केन्द्रीय विद्यालय संगठन कोलकाता संभाग

KENDRIYA VIDYALAYA SANGATHAN, KOLKATA REGION

सत्रांत परीक्षा / SESSION ENDING EXAMINATION, 2025-26

कक्षा / CLASS-VIII अधिकतम अंक/Max. Marks: 60

विषय/Sub.: संस्कृतम् / SANSKRIT समय/Time: 2 ½ सार्धहोराद्वयम् / Hrs.

छात्रस्य नाम ....................................................क्रमांकः(Roll No)............

कक्षा अनुभागश्च (Class & Sec) .......... दिनांक(Date) ..................

पर्यवेक्षकस्य हस्ताक्षरम् परीक्षकस्य हस्ताक्षरम्

---

**निर्देशाः-(i) प्रश्नपत्रे चत्वारःखण्डाः सन्ति –**

**खण्डः (क) अपठित-अवबोधनम् - 08 अङ्काः**

**खण्डः (ख) रचनात्मकंकार्यम् -12 अङ्काः**

**खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 15 अङ्काः**

**खण्डः (घ) पठित-अवबोधनम् - 25 अङ्काः**

**(ii) सर्वेप्रश्नाःअनिवार्याः सन्ति ।**

**(iii) उत्तराणि यथास्थानं संस्कृतेनैव लेखनीयानि ।**

**(iv) प्रश्नपत्रं पठितुं पञ्चदशनिमेषाः निर्धारिताः ।**

## खण्डः (क) अपठितम् अवबोधनम् ( 08 अङ्काः)

### (1) अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत् -

एकस्मिन् वने एकः परिश्रमी काकः आसीत् । एकदा सः बहुकालपर्यन्तं उड्डयनम् अकरोत्।अतः सः बुभुक्षया पिपासया च पीडितः अभवत् । वने भोजनाय पक्वानि फलानि तु प्राप्तानि। परन्तु पिपासां शमयितुं कुत्राऽपि जलं न दृष्टम् । सः परिश्रमी काकः जलं पातुम् इतस्ततः अभ्रमत् । अन्ते सः एकं घटम् अपश्यत् । घटे स्वल्पं जलम् आसीत् । अतः काकः जलं पातुम् असमर्थः अभवत् । अन्ते सः एकम् उपायम् अचिन्तयत् । सः

पाषाणखण्डानि घटे अक्षिपत् । एवं क्रमेण जलम् उपरि समागच्छत् । काकः जलं पीत्वा सुखम् अलभत । उक्तम् च – " उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः " इति ।

**(क) एकपदेन उत्तरत** 1 X 2 = 2

i. काकः कुत्र आसीत् ? ......................

ii.कः जलं पातुम् असमर्थःआसीत् ? ......................

**(ख) पूर्णवाक्येन उत्तर** 2 X 2 = 4

i. काकः कया पीडितः अभवत् ?

..........................................................................................

..........................................................................................

ii. काकः कानि घटे अक्षिपत् ?

..........................................................................................

..........................................................................................

**(ग) भाषिककार्यम् ( कोष्ठकात् शुद्धम् उत्तरं चिनुत )** 1/2 X 4 = 2

(i)" काकः जलं पातुम् असमर्थः अभवत्" अत्र क्रियापदं किम्? ......................

( काकः / जलं / अभवत्)

(ii) "सः एकं घटम् अपश्यत्"- अस्मिन् वाक्ये कर्तृपदं किम् ? ......................

( अपश्यत् / घटम् / सः )

## खण्डः (ख) रचनात्मकं कार्यम् (12 अङ्काः)

**(2) अधोलिखितं चित्रं दृष्ट्वा मञ्जूषाप्रदत्तशब्दैः वाक्यानि पूरयन्तु। 1 X 5 = 5**



मञ्जूषा

| |
|---|
| उपस्थिताः अध्यापकौ , अध्यापिका , विद्यालयस्य , स्वतंत्रतादिवसस्य |

(क) अस्मिन् चित्रे ............................................ आयोजनं भवति।

(ख) ........................................ प्राचार्यः त्रिवर्णध्वजस्य उत्तोलनं करोति।

(ग) चित्रे द्वौ ................................................ उपस्थितौ स्तः।

(घ) विद्यालयस्य एका ........................................ अपि विराजमाना अस्ति।

(ङ) अस्मिन् अवसरे त्रयः छात्राः ........................................ अपि सन्ति।

**(3)मञ्जूषातः वाक्यांशं चित्वा वाक्यानि पूरयत।** **1 X 5 = 5**

(क) पुरा भगवान् धन्वन्तरिः............................................... प्रतिग्रामम् अभ्रमत्।

(ख) अन्ते सःवाग्भटस्य कुटीरसमीपे गत्वा...................................... शब्दम् अकरोत्।

(ग)चिकित्सानिरतः वाग्भटः ............................................... फलानि समर्पितवान्।

(घ) परन्तु सः खगः............................................. तथैव प्रश्नरूपेण शब्दम् अकरोत्।

(ङ) ततः वैद्यः वाग्भटः उत्तरम् अददात्- .................................................. इति।

मञ्जूषा-

| |
|---|
| कोऽरुक् कोऽरुक् कोऽरुक् , फलानि न गृहीत्वा पुनरपि , मनोहरं शुकरूपं धृत्वा , हितभुक् मितभुक् ऋतुभुक् , तस्मै शुकाय मधुराणि |

**(4) शब्दजालं दृष्ट्वा चतुर्सार्थकशब्दान् रेखाङ्कयत लिखत च।(any Four)** 1/2 X 4= 2

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ज | न | जा | तिः | म | त्रि | खा | सी |
| च | अ | र | सि | णि | पु | ना | गा |
| भ्रा | ता | स | क्कि | पु | रा | ज्या | नि |
| मि | जो | र | मः | र | सं | स्कृ | तिः |
| पू | र्वो | त्त | र | म् | दे | श | स्य |
| ब | स | प्त | भ | गि | न्यः | गा | रो |
| प्रा | कृ | तिः | कः | वं | श | वृ | क्षः |
| भ | गि | नी | अ | रु | णा | च | लः |

(क) ................................... (ख) .......................................

(ग) ................................. (ग)......................................

## खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - (15 अङ्काः)

(5) **प्रदत्तशब्दानां संधिविच्छेदं कुरुत ।** **1 X 4 = 4**

(क) ततोऽसौ = ततः + .............. (ख) कापि = ........... + अपि

(ग) यथेष्टम् = यथा + ............ (घ) कस्मादपि = ................... + अपि

**(6) अधोलिखितपट्टिकातः विशेषणपदानि विशेष्यपदानि च पृथक् कृत्वा उचितसञ्चिकायां पूरयत ।** **1 X 4 = 4**

| |
|---|
| **लौकिकः , खगः , उत्तमस्य , वाग्भटः** |

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| .................................... | ........................................ |
| .................................... | ........................................ |

(7)**अधोलिखितेषु प्रकृति-प्रत्ययविभागं कुरुत ।** **1 X 4 = 4**

(क) यथा-- गन्तुम् = गम् + तुमुन्

(ख) ज्ञातुम् = ...................... + ..................

(ग) खादितुम् = ............... + ......................

(घ) यथा -- हसनीयम् = हस् + अनीयर्

(ङ) पठनीयम् = ................. + .....................

(च) गमनीयम् = .................. + .....................

**(8) अव्यस्थितान् वर्णान् शब्ददृष्ट्या व्यवस्थितरूपेण लिखत । 1 x 3 = 3**

उदाहरणम् – वेयवित्तीसमानशम् = वित्तीयसमावेशनम्

(क) कसङ्गम्ण = ...................................

(ख) कार्वसरः = .....................................

(ग) लयःविद्या = ....................................

**खण्डः(घ) अवबोधनम्-पठित - 25 अङ्काः**

(9) **अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत ।**

आसीत् शोभावती नाम काचन नगरी। तत्र शूद्रको नाम महापराक्रमी महीपतिः प्रतिवसति स्म। अथैकदा वीरवरनामा राजपुत्रः वृत्यर्थं कस्मादपि देशाद् राजद्वारम् उपागच्छत् ।तेन सह वेदरता नाम तस्य पत्नी,शक्तिधरो नाम सुतः,वीरवती नाम कन्या च समायाताः।

वीरवरः- देव ! यदि सौभाग्येन अहं भवतः सेवायां नियोजितः तर्हि यदादिश्यते तत् श्रद्धया
पालयिष्यामि।

राजा- किं ते वर्तनम् ?

वीरवरः- प्रतिदिनं सुवर्णशतचतुष्टयं देव!

राजा- का ते सामग्री ?

वीरवरः- इमौ बाहू एषः खड्गश्च ।

**(क)एकपदेन उत्तरत -** ½ X 2 = 1

(i) का नाम काचन नगरी आसीत् ? .................................

(ii) कन्यायाः नाम किम आसीत् ? ..................................

**(ख) पूर्णवाक्येन उत्तरत -** 1 x 2 = 2

(i) वीरवरनामा राजपुत्रः किमर्थं कस्मादपि देशाद् राजद्वारम् उपागच्छत् ?

..............................................................................................

..............................................................................................

(ii) वीरवरेण सह के-के समायाता?

.........................................................................................................

.........................................................................................................

**(ग) भाषिककार्यम् - मञ्जूषातः शुद्धम् उत्तरं चित्वा लिखत** **1 x 2 = 2**

(i) "तत्र शूद्रकः प्रतिवसति स्म "अत्र क्रियापदं किम् ? ............................

( तत्र / शूद्रकः / प्रतिवसति स्म )

(ii) "तत्र शूद्रकः प्रतिवसति स्म "अत्र कर्तृपदं किम् ? .............................

( तत्र / शूद्रकः / प्रतिवसति स्म )

**(10) अधोलिखितं पद्यांशं पठित्वा उत्तराणि लिखत ।**

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥

**(क)एकपदेन उत्तरत -** ½ X 2 = 1

(i) क्रोधात् किं/कः भवति ? .................................

(ii) स्मृतिभ्रंशात् किं/कः भवति ? ..................................

**(ख) पूर्णवाक्येन उत्तरत -** 1 x 2 = 2

(i) केन सर्वे जन्तवः तुष्यन्ति ?

.........................................................................................................

.........................................................................................................

(ii) कस्मात् स्मृतिविभ्रमः भवति ?

.........................................................................................................

.........................................................................................................

**(ग) भाषिककार्यम् – मञ्जूषातः शुद्धम् उत्तरं चित्वा लिखत** **1 x 2 = 2**

(i) "सम्पन्नता" इति पदस्य विलोमपदं चित्वा लिखत । ........................
( वचने / दरिद्रता / जन्तवः )

(ii) "प्राणिनः" इति पदस्य पर्यायपदं चित्वा लिखत । ..........................
( सर्वे / तुष्यन्ति / जन्तवः )

**(11) मञ्जूषातः चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** **1X 4 = 4**

(क) <u>परमेश्वरः</u> सर्वत्र व्याप्तः अस्ति । ( कस्मै / का / कः )

..............................................................................................

(ख) वयम् <u>ईश्वरं</u> नमामः । ( कम् / कस्मात् / कः )

..............................................................................................

(ग) <u>ईश्वरस्य</u> प्रार्थनया शान्तिः प्राप्यते ।( कस्मै / कस्य / केन )

..............................................................................................

(घ) मन्त्राः <u>वेदेषु</u> भवन्ति । ( केन / केषु / कुत्र )

..............................................................................................

**(12) रेखाङ्कितानि पदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत।** **1X 4 = 4**

(क) अहं <u>भवतः</u> सेवायां नियोजितः । राज्ञे

(ख) तत् <u>अहम्</u> अपि गच्छामि पृष्ठतोऽस्य । ..........................

(ग) <u>सा</u> चातीव दुःसाध्या । ..........................

(घ) किं <u>ते</u> वर्तनम् ? ..........................

**(13) भिन्नप्रकृतिकं पदं चिनुत ।** **1X 4 = 4**

(क) गच्छति , पठति , धावति , अहसत् , क्रीडति

(ख) छात्र् , सेवकः , शिक्षकः , लेखिका , क्रीडकः

(ग) पत्रम् , मित्रम् , पुष्पम् , आम्रः , फलम्

(घ) व्याघ्रः , भल्लुकः , गजः , कपोतः , शाखा

**(14)पाठम् आधृत्य उदाहरणानुगुणम् 'आम्' अथवा 'न' लिखत ।** **½ x 6 = 3**

(क) किं वीरवरः स्ववेतनस्य चतुर्थभागं एव पत्न्यै यच्छति स्म ? ................

(ख) किं करुण-रोदन-ध्वनिं राजा श्रुतवान् ? ...............

(ग) किं करुण- रोदन-ध्वनिः दिवसे श्रुतः आसीत् ? ................

(घ) किं राजलक्ष्म्या उक्तः उपायः अतीव दुःसाध्यः आसीत् ? ................

(ङ) किं भगवती सर्वमङ्गला उपायं संसूच्य शीघ्रमेव अदृश्या अभवत् ?.............

(च) किं वीरवरः राजपुत्रः आसीत् ? ..............

*****